| | | | |
|---|---|---|---|
| पूयः, [1]पूयिता, | पूयः, | पुपूयिषुः, | पोपूयः ; |
| पूयितव्यम्, | पूययितव्यम्, | पुपूयिषितव्यम्, | पोपूयितव्यम् ; |
| पूयनीयम्, | पूयनीयम्, | पुपूयिषणीयम्, | पोपूयनीयम् ; |
| पूय्यम्, | पूय्यम्, | पुपूयिष्यम्, | पोपूय्यम् ; |
| ईषत्पूयः-दुष्पूयः-सुपूयः ; | | — | — |
| पूय्यमानः, | पूय्यमानः, | पुपूयिष्यमाणः, | पोपूय्यमानः ; |
| पूयः, | पूयः, | पुपूयिषः, | पोपूयः ; |
| पूयितुम्, | पूययितुम्, | पुपूयिषितुम्, | पोपूयितुम् ; |
| [2]पूतिः,[A] | पूयना, | पुपूयिषा, | पोपूया ; |
| पूयनम्, | पूयनम्, | पुपूयिषणम्, | पोपूयनम् ; |
| पूयित्वा, | पूययित्वा, | पुपूयिषित्वा, | पोपूयित्वा ; |
| प्रपूय्य, | प्रपूय्य, | प्रपुपूयिष्य, | प्रपोपूय्य ; |
| पूयम् २ ; पूयित्वा २ ; | पूयम् २ ; पूययित्वा २ ; | पुपूयिषम् २ ; पुपूयिषित्वा २ ; | पोपूयम् २ ; पोपूयित्वा २. |

(1037) **"पूरी आप्यायने"** (IV-दिवादिः-1151. अक. सेट्. आत्म.)

**'आप्यायनम्=वृद्धिः ।' इति क्षीरस्वामी ।**

**'पूरेराप्यायनेऽर्थे स्यात् पूर्यते पूरयेदपि ॥' ( श्लो. 150) इति देवः ।**

| | | | |
|---|---|---|---|
| पूरकः-रिका, | पूरकः-रिका, | पुपूरिषकः-षिका, | पोपूरकः-रिका ; |
| पूरिता-त्री, | पूरयिता-त्री, | पुपूरिषिता-त्री, | पोपूरिता-त्री ; |
| — | पूरयन्-न्ती, | पूरयिष्यन्-न्ती-ती ; | — — |

---

1. धातोरस्यानुदात्तेत्त्वात्, हलादित्वाच्च तच्छीलादिषु कर्तृषु प्राप्तो युच्, '**न यः**' (3-2-152) इति निषिध्यते । तेन, 'तृन्' (3-2-135) इति औत्सर्गिकः तृन्नेव ।
2. स्त्रियां भावादौ, 'गुरोश्च हलः' (3-3-103) इति प्राप्तमकारप्रत्ययं बाधित्वा, बाहुलकात्, 'क्तिन् **आबादिभ्यः**' (वा. 3-3-94) इत्याबादित्वात्, 'गन्धस्येद् उत्पूतिसुसुरभिभ्यः' (5-4-135) इत्यत्र '**पूति—**' इति निर्देशाच्च क्तिन्नेव भवति । क्तिनि वलिलोपे च रूपमेवम् ।

A. 'गोदोहदेशे रयितं सहाग्रजं तमूतसत्कीर्तिम् **अपूतिभिर्गुणैः** ॥' धा. का. 1·62.